[1]कृत्यम्-[A]कार्यम्, कार्यम्, चिकीर्ष्यम्, चेक्रीय्यम्;

ईषत्करः-[B]दुष्करः-सुकरः, [2]ईषदाढ्यङ्करः[C]-दुराढ्यङ्करः-स्वाढ्यङ्करः;

[3]क्रियमाणः-संस्क्रियमाणः, कार्यमाणः, चिकीर्ष्यमाणः, चेक्रीय्यमाणः;

कारः-उपकारः-[D]अपकारः-[4]प्राकारः, [5]चक्रम्, [6]कृत्रिमम्-[E]असंस्कृत्रिमम्, कारः, चिकीर्षः, चेक्रीयः;

कर्तुम्-[F]व्याकर्तुम्,

---

1. 'विभाषा कृवृषोः' (3-1-120) इति क्यप् वा भवति। पक्षे, 'ऋहलोः—' (3-1-124) इति ण्यत्। क्यपि तुक्।

2. 'कर्तृकर्मणोश्च भूकृञोः' (3-3-125) इति खल्। 'कर्तृकर्मणोश्च्व्यर्थयोरिति वक्तव्यम्' (वा. 3-3-127) इति वार्तिकात् च्व्यर्थे। 'ईषन्मालङ्करं पुष्पं सुपिण्डङ्कर ओदनः। दुस्सेनानिङ्करो भीरुः। खित्वाद्ध्रस्वमुमागमौ॥' इति प्रक्रियासर्वस्वे।

3. यकि, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशः। 'रीङि प्रकृते रिङादेशविधानसामर्थ्यात् 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घो न।' इति सिद्धान्तकौमुदी।

4. 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति उपसर्गस्य दीर्घः। प्रक्रियते इति प्राकारः=सालः। कर्मणि घञ्।

5. 'घञर्थे कविधानम्—' (वा. 3-3-19) इति वार्तिकात् घञर्थे कः प्रत्ययः। 'द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम्' (वा. 6-1-12) इति द्वित्वम्। यण्।

6. 'ड्वितः क्त्रिः' (3-3-88) इति भावे क्त्रिः। 'क्त्रेर्मम्नित्यम्' (4-4-20) इति सूत्रेण, 'निर्वृत्ते—' (4-4-19) इत्यस्मिन्नर्थे मप्प्रत्ययः। 'नित्यम्' इत्युक्तः मप्प्रत्ययान्त एव प्रयोज्यः।

A. 'धर्मकृत्यरतां नित्यम् अकृष्यफलभोजनाम्।' भ. का. 6-62.

B. 'अरण्ययाने सुकरे पिता मां
प्रायुङ्क्त राज्ये बत दुष्करे त्वाम्।' भ. का. 3. 51.

C. 'ईषदाढ्यङ्करोऽप्येष न परत्राशुभक्रियः।' भ. का. 7-84.

D. 'अपकारे कृतेऽप्यज्ञो विजिगीषुर्न वा भवान्॥' भ. का. 5-9.

E. 'असंस्कृत्रिमसंख्यानौ अनुप्त्रिमफलाशिनौ।' भ. का. 4-37.

F. 'ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्॥' शिशुपालवधे 2-26.